National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(62): 160-162
© 2025 NJHSR
www.sanskritarticle.com

डॉ मनीषभारद्वाजः
सहायकाचार्य वेद विभाग,
श्री दीवान कृष्ण किशोर सनातन धर्म-
आदर्श संस्कृत कॉलेज, अंबाला छावनी

Correspondence:
डॉ मनीषभारद्वाजः
सहायकाचार्य वेद विभाग,
श्री दीवान कृष्ण किशोर सनातन धर्म-
आदर्श संस्कृत कॉलेज, अंबाला छावनी

# यजुर्वेदे कृष्णशुक्लयोः वैशिष्ट्यम्

डॉ मनीषभारद्वाजः

ऋग्यजुः सामाथर्वाख्यश्चत्वारो वेदाः सन्ति। ऋग्वेदो होतुः पुरोधसस्तदनुयायिनाञ्च धर्ममाख्याति, यजुर्वेदोऽध्वरयोः पुरोधसस्तदनुयायिनाञ्च धर्ममथ च सामवेद उद्गातुः पुरोधसस्तद्नु-वर्त्तिनाञ्चेति धर्ममाख्याति। तथा च यज्ञीयब्राह्मणोऽपि सर्वो विधिरथर्वोक्तदिशा विधेय इति समायान्ति। "विधिर्विधेयस्तर्कश्च वेदः। विधिर्नाम ब्राह्मणम्। विधेयो नाम मन्त्रः। तर्को नाम अर्थवादः।

शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनशाखा प्रशंसाः यजुर्वेदकल्पतरौ

**ॐकार प्रौढमूलक्रमपदसहितश्छन्दविस्तीर्णशाखौ ऋपत्रः।**
**सामपुष्पो यजुरधिकफलोऽथर्वगन्ध दधानः ।।**
**यज्ञच्छायासमेतो द्विजमधुपगणैः सेव्यमानः ।**
**प्रभाते मध्ये सायं त्रिकालं सुचरितचरितः पातु वो वेद वृक्षः ।।**[1]
**सन्मूलो यजुराख्यवेदविटपी जीयात्स माध्यन्दिनिः**
**शाखा यत्र युगेन्दुकाण्डसंहिता यत्रास्ति सा संहिता ।**
**यत्राभाब्धिलता विभान्ति शरशैलाकन्दुभी ऋग्दलैः**
**पञ्चद्वीषनुभोङ्कवर्णमधुपैः खाग्न्यर्कगुङ्गुञ्जितैः ।।**[2]

अर्थात् काण्डानि चतुर्दश (14), अध्यायाः 40, मन्त्राः 1975, अक्षराणि 90525, ह्रस्व 4, दीर्घ ७ इत्याकाराण्यनुस्वारचिह्नानि 1230 सन्ति। देवीभागवतेऽपि माध्यन्दिनशाखावर्णनप्रशंसा-प्रसङ्गे उक्तं वेदव्यासेन –

**अयातयामानि तु भानुगुप्तान्यन्यानि जातान्यतिनीरसानि ।**
**यजूंषि तेषामथ याज्ञवल्क्यो ह्यातयामानिरवेरवाप ।।**

कलौं माध्यन्दिनीशाखा कलौं चण्डीविनायकः इति वायुपुराणे वाजिशाखिनां महर्षिणां चर्चा वर्णनप्रसग उक्तं हि वेदव्यासेन

**शक्रसोमाग्निरुद्धाश्च विश्वेदेवास्त्रिलोचनः ।**
**विधाता शङ्खपाणिश्च तथा सप्तर्षयोऽमलाः ।।**
**मृकुण्डकपिलव्यासयाज्ञवल्क्यपराशराः**
**वाल्मीकिर्नारदोऽगस्त्य इत्येते वाजिशाखिनः।।**

शुक्लयजुर्वेदीय माध्यन्दिनब्राह्मणप्रशंसा हालिभाष्ये -

**ऋग्वेदी च पितृस्थाने यजुर्वेदी पितामहः।**
**त्रिवेदी प्रपितुः स्थाने विश्वेदेवा ह्यथर्ववित्।।**
**वाजिविप्रविशेषेण श्राद्धकर्म निरन्तरम्।**
**शुक्लाः प्रशस्ताः कृष्णास्तु यजुरुक्तनिषेधतः॥**

**तस्मात्काव्यानि हव्यानि दातव्यानि द्विजातये।**
**वाजिने दत्तमेकं तु तत्कोटिगुणितं भवेत्॥**

अस्मादृश्ये हि अल्पश्रुतैः यजुर्वेदराशेः रीयत्तरा महत्त्वनिर्धारिणं नितरां दुःस्कम् । तथापि यथा बुद्धिबलं प्रयत्नं कृतम्। अश्वमेधशब्दस्य विद् धातु मूलकत्वात् तद् धात्वविधेयसन्दर्भ प्रसिद्धा कारिका-

**सत्तायां विद्यते ज्ञाने वेत्ति वित्ते विचारणे।**
**विन्दते विन्दति प्राप्तौ श्यन्लुकरनम् शेष्विदं क्रमात्॥**[3]

इति चत्वारो अर्थाः सुसम्पदाः। यद्यपि वेदी एको अखण्डश्च तथापि भगवता वेदव्यासेन चतुर्षु विभागेषु व्यवस्थापिता। तथाहि -

**चातुर्होत्रं कर्मशुद्धं प्रजानां वीक्ष्यवैदिकम्।**
**व्यदधाद् यज्ञ समवत्यै वेदमेकं चतुर्विधम् ।।**
**ऋग्यजुः सामाथर्वाख्या वेदाश्चत्वार उद्धृता।**
**इतिहासपुराणं च पञ्चमो वेद उच्यते ।।**
**तत्रर्वेदधरः पैलः सामगो जैमिनिः कविः।**
**वैशम्पायन एवैको निष्णातो यजुषामुत ।।**
**अथर्वाङ्गिरसामासीत्सुमन्तुर्दारुणो मुनिः।**
**इतिहासपुराणानां पिता मे रोमहर्षणः ॥**
**त एत ऋषयो वेदं स्वं व्यस्यन्ननेकधा ।**
**शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन्।।**
**त एव वेदादुर्मेधैर्धार्यन्ते पुरुषैर्यथा।**
**एवं चकार भगवान् व्यासः कृपणवत्सलः ।।**[4]

एभिः प्रमाणैः वेदस्य सार्वभौमिकप्रतिष्ठा प्रतिपाद्यते। सर्वाणि शास्त्राणि सर्वाणि दर्शनानि यजुर्वेदेन साकं सम्बन्धमविधाय आत्मनं धन्यं मन्यन्ते। प्रायः सर्वेऽपि महानुभावाः वेदानां महत्त्वं निखिलशास्त्राणामपेक्षया प्राचीनतमत्वञ्च मन्यमानाः तद्विषयकं समालोचनादिकं विदद्धति। एतादृशस्य सर्वज्ञानविज्ञानविजृम्भितस्य यजुर्वेदस्य वचोभिः दुष्करमेव। तथापि यथा मति निरूपणम् इति लघु प्रयासः।

सर्वासां विद्यानां वेद एव संसारेऽस्मिन् केवलमनन्यतो ग्रन्थः। न केवलं सर्वप्राचीनमात्रत्वादपितु ज्ञानविज्ञानयोः प्रवर्तनादपि स्वकीयं श्रेष्ठत्वं प्रतिपादयति। विषयवस्तु आनन्दस्य तदा अधिकं वर्तते, वर्धते यदा वैज्ञानिकैः स्वकीयदृष्ट्यापि अन्वेषणं कृत्वा दृढरूपेण वैदिकसिद्धान्ताः प्रतिष्ठाप्यन्ते।

समस्तेष्वास्तीकदर्शनेषु वेद व्याख्या एव दृष्टिगोचरा भवति, परं तेषां व्याख्यासु सत्यस्वरूपावबोधायमतविभेदः प्रत्यक्ष एव दृश्यते।

यद्यपि स्वयं वेदाध्येतारो वेदस्य वैज्ञानिकस्वरूपादनाभिज्ञाः सन्तः वेदशब्दोच्चारणमेव वेदसारं मन्यन्ते, परं यास्केन वेदमन्त्रद्वारा वेदानां ज्ञानस्य प्रशंसया वेदार्थज्ञानेन लोककल्याणं सम्भवमित्युक्तम्। एकस्मिन् अपरस्मिन्मन्त्रेऽपि अर्थज्ञानमेव परं ज्ञानमिति प्रतिपादितम्। परं शब्दज्ञानमृते परमार्थज्ञानं नैव लब्धुं शक्य, अत एव तदपि आवश्यकम्। वेदा अस्माकमृषिभिरुपदिष्टं विकसितविज्ञानं परिकल्पयन्ति। यत्र चराचरसमस्तजगतां तत्त्वानां ज्ञानं विहितमस्ति । वेदतत्त्वं स्वत एव लौकिक-पारलौकिकज्ञानस्य स निधिः वर्तते, यां विद्यामलौकिकदृष्ट्या ऋषयः साक्षात्कारं कृतवन्तः उपदेशेन च जनसामान्यमवबोधितवन्तः। निरुक्तशास्त्रेऽपि इयं प्रक्रिया उल्लिखिता वर्तते साक्षात्कृतधर्माणो ऋषयो बभूवुः। तेऽवरेभ्यः असाक्षात्कृत-धर्मेभ्यः उपदेशेन मन्त्रान् सम्प्रादुः।

**शुक्लकृष्णयोर्भेदः**[5] यजुर्वेदः कृष्णशुक्लयोः नामकौ द्वौ भागौ विभक्तौ स्तः। तयोः सम्बन्धयोः द्वयोः

सम्प्रदायः प्राप्यते। ब्रह्मसम्प्रदायः तथा आदित्यसम्प्रदायस्य कृष्णयजुर्वेदस्य प्रतिनिधिः ब्रह्मसम्प्रदायोऽस्ति एव शुक्लयजुर्वेदस्य प्रतिनिधिः आदित्यसम्प्रदायः अस्ति। रहस्यास्य प्रतिपादकवाक्यं शतपथब्राह्मणे उद्धृतमस्ति। याज्ञवल्क्येन शुक्लयजुः आख्यातोऽस्ति। **'आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येना-ख्यायन्ते'।**"[6] यजुर्वेदस्य मुख्यः वैशम्पायनऋषिः, भारद्वाजगोत्रः, रुद्रदेवता, त्रिष्टुप्छन्दः, ताम्रवर्णोऽस्ति। याज्ञवल्क्यः वैशम्पायनस्य एव शिष्यः आसीत्। कालान्तरे तयोः मध्ये वैमत्यमुत्पन्नं जातम्। क्रोधस्य वशीभूत्वा वैशम्पायनः उक्तवान् यत् **'विप्रावमन्त्रा शिष्येण मदधीतं त्यजाश्विति'।**"[7] याज्ञवल्क्यः गुरुभक्तः आसीत्। याज्ञवल्क्यः तां विद्यां तस्मै ऋषये प्रददाति वमनक्रियामाध्यमेन वैशम्पायनस्य अन्यान्यशिष्यैः गुरुवर्यस्य आज्ञातः तित्तिरखगरूपेण तां विद्यां भक्षितवन्तः वमनकारणादिदं मलिनं जातम्, तदा तस्य कृष्ण-यजुः वा तैत्तिरीयसंहिता अपि वक्तुं शक्यते।[8] तदनन्तरं याज्ञवल्क्यः सूर्योपासनां कृत्वा एकं नूतनवेदं प्रकटयामास वा शुक्लयजुर्वेदः वा वाजसनेयि माध्यन्दिनसंहिता वा तदेव विज्ञैः अभिधीयते।

'यज्ञ' नामकमिदं महत्तरं पवित्रं च वैदिकं कर्म, अस्यामेव पुण्यभूमौ अनादिकालतोऽस्मत्पूर्वजैरनुष्ठीयमानं दृश्यते। अत एवाऽयं देशो यज्ञीयो देश इति च व्यपदिष्टः। इदं 'यज्ञ' नामकं पवित्रं कर्म, इह परलोकसाधकम्, श्रेयः प्रेयो विधायकमिति च ऋषिभिरुद्घोषितम्। **'यज्ञो वै श्रेष्ठतमं कर्म'**[9] भारतीय आर्षवाङ्मये सर्वत्र 'यज्ञ' नामकमिदं महत्तरं कर्म बहुधा प्रशंसितमुपलक्ष्यते वैदिकोऽयं यज्ञो भारतीया-नामृषीनामौदार्यस्य लोककल्याणकामनायाश्चोज्ज्वलम् उदाहरणम्। यज्ञस्य महत्त्वमुद्घोषयंती श्रुतिरमुं 'यज्ञं' भुवनस्य सकलस्य नाभित्वेनोपवर्णयति। यथा **'अयं यज्ञो भुवनस्य नाभिः।** मानवधर्मोप-देष्टामनुर्यज्ञस्य महत्त्वमुद्घाटयन्निदं कथयति-

**महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ।**[10]

अर्थात् पञ्चमहायज्ञानामनुष्ठानेन इयं तनुः अर्थादेतत्तन्वच्छिन्नः आत्मा ब्राह्मी, ब्रह्मप्राप्तियोग्यः भवति। अतः यज्ञः जीवस्य ब्रह्मत्वप्रापकः ।

**सन्दर्भ ग्रन्थः -**

[1] आह्निकसूत्रावली, पृ. 65

[2] आह्निकसूत्रावली, पृ. 4

[3] सि. कौ. चु. प्र.

[4] श्रीमद्भागवतमहापुराणम्, 1/4/19-24

[5] स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्।
योऽर्थज्ञ इत्सकलभद्रमश्नुते नाकमेतिज्ञान विधूतपादपा। निरुक्तम् 1/19

[6] निरुक्तम्, पृ. 57

[7] श. ब्रा. 14/9/33

[8] श्रीमद्भागवते 12/6/63

[9] श. ब्रा. 1/7/1/5

[10] मनु, 2/28